# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – २** | **गुणाः – ५०** |
| **विषयः – पुराणेतिहासः** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १४/०७/२०२१** | **सन्दर्भग्रन्थः – महाभारतम् शान्तिपर्व (राजधर्मानुशासनपर्व नियतांशः)** | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ ब्राह्मणानां यथा धर्मो दानमध्ययनं तपः।
क्षत्रियाणां तथा कृष्णे समरे देहपातनम्॥

२ पञ्चाशतं षट् च कुरुप्रवीर शेषं दिनानां तव जीवितस्य।
ततः शुभैः कर्मफलोदयैस्त्वं समेष्यसे भीष्म विमुच्य देहम्॥

३ दान्तो विधेयो हव्यकव्येऽप्रमत्तो ह्यन्नस्य दाता सततं द्विजेभ्यः।
अमत्सरी सर्वलिङ्गप्रदाता वैताननित्यश्च गृहाश्रमी स्यात्॥

४ सर्वे त्यागा राजधर्मेषु दृष्टाः सर्वा दीक्षा राजधर्मेषु प्रोक्ताः।
सर्वा विद्या राजधर्मेषु युक्ताः सर्वे लोका राजधर्मे प्रविष्टाः॥

**प्रश्नः २** श्रीभीष्मेण कृतं राजधर्मवर्णनं यथाग्रन्थं विधीयताम्।

**प्रश्नः ३** वर्णाश्रमधर्मस्य वर्णनं कृत्वा राजधर्मस्य श्रेष्ठता यथाग्रन्थं विलिख्यताम्।

**प्रश्नः ४** इन्द्रमान्धात्रोः संवादः ग्रन्थानुसारं विलिख्यताम्।

**प्रश्नः ५** युधिष्ठिरस्य विरक्तिवर्णनं सविस्तरं विधीयताम्।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ न मे राष्ट्रे विधवा ब्रह्मबन्धुर्न ब्राह्मणः कितवो नोत चोरः।
अयाज्ययाजी न च पापकर्मा न मे भयं विद्यते राक्षसेभ्यः॥

२ अहिंसा सत्यवचनमानृशंस्यं दमो घृणा।
एतत् तपो विदुर्धीरा न शरीरस्य शोषणम्॥

३ मन्त्रमूढा हि राज्यस्य मन्त्रिणो ये मनीषिणः ।
मन्त्रसंहननो राजा मन्त्राङ्गानीतरे जनाः ॥

४ सान्त्वमेकपदं शक्र पुरुषः सम्यगाचरन् ।
प्रमाणं सर्वभूतानां यशश्चैवाप्नुयान्महत् ॥

प्रश्नः ७ मित्रामित्रलक्षणानां विवेचनं यथाग्रन्थं कुरुत ।

प्रश्नः ८ राष्ट्ररक्षावृद्ध्यै किं करणीयम् ? यथाग्रन्थं वर्णयत ।

प्रश्नः ९ उतथ्योपदेशवर्णनं ग्रन्थानुसारं वर्णयत ।

प्रश्नः १० राज्ञः कर्तव्यवर्णनं यथाग्रन्थं वर्णयत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ भीष्माय कः वरं अददत् ?
२ मान्धाता कः अस्ति ?
३ इन्द्ररूपधारी कः ?
४ इहलोकपरलोकयोः प्राप्तिहेतौ कति गुणाः सन्ति ?
५ भीष्मः कस्य गुणकथनमकरोत् ?
६ भीष्मस्य जीवनस्य कति दिनानि अवशिष्टानि आसन् ?
७ शत्रुदमनराज्ञः कः ?
८ मिथिलेश्वरः कः ?
९ शान्तनुनन्दनः कः ?
१० वृष्णिवंशी कः ?
११ श्रीभीष्मप्रशंसां कः अकरोत् ?
१२ राज्ञः महान् धर्मः कः ?
१३ अम्बरीषेन्द्रयोः संवादे कयोः वर्णनमस्ति ?
१४ उतथ्यस्य उपदेशे किमस्ति ?
१५ ‘पुरन्दर’ सम्बोधनं कस्य कृते अस्ति ?

****